प्रस्तुतं । तत्रेदं विचार्यते किं वैदिके यूपोच्छ्रयणादि विषये स्पर्शे प्रायश्चित्तं उत लौकिके उतोभयत्रेति विशेषाश्रवणाद नियमः प्रकरणात् फलकल्पनापरिहाराच्च वैदिक एवेति प्राप्ते । उच्यते । दोषनिर्हरणाय इदं प्रायश्चित्तं विधीयते दोषश्च प्रतिषिद्धस्य स्यात् प्रतिषेधश्च लौकिके यूपो वै यज्ञस्य दुरिष्टमामुंचते तस्माद्यूपो नोपस्पृश्य इति प्रतिषिध्यपश्चादिदमुच्यते यद्येकमित्यादि प्रतिषेधश्च रागप्राप्ते लौकिके वैदिकस्य विहितत्वेन प्रतिषेधानर्हत्वात् प्रतिषेधानुष्ठानेऽन्यस्य वा यो सक्तेः प्रतीकारापेक्षायां प्रायश्चित्तविधिरपेक्षितार्थो भवति तस्माल्लौकिके प्रायश्चित्तं ॥ ॥अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वादविशेषाच्चतेनान्यस्य॥ अग्नीषोमीयपशावेकवचनांतः पाशमंत्रः अदितिः पाशं प्रमुमो[illegible]तमिति । तथा बहुवचनांतोऽदितिः पाशान्प्रमुमो[illegible]तानिति तयोरग्नीषोमीयनिवेशमुपरितनेऽधिकरणे वक्ष्यति । तयोर्द्विपशुके पशुमे त्र्यश्वेतमालभेत वारुणं कृष्णमित्यादिषु चोदके न प्राप्तयोर्भवति संशयः । किमेकवचनांतस्य प्रवृत्तिः बहुवचनांतस्यानूहेन प्रवृत्तिरुत बहुवचनांतस्य प्रवृत्तिरेकवचनांतस्योहेन प्रवृत्ति । रथवोभावपि यथायथमूहेनानूहेन च प्रवर्तेते । किंवोभयोरपि द्विवचनोहितयोः प्रवृत्तिरिति । तत्रैकवचनस्य प्रकृतौ समवेतार्थाभिधायित्वेन विकृतावपि द्विसंख्यावत्त्वं विकारः स्यात् बहुवचनस्य त्वेकस्मिन्नसमवेतार्थाभिधायित्वेन निर्देशमात्रार्थत्वाद्विकृतावपि तथैव संभवादनूहः । न चाविकारसंभवे विकारो युक्तः तस्मादेकवचनांतस्य प्रवृत्तिरितरस्य त्वविकारेण प्रयोग इति प्रथमः पक्षः । सकलाभिधानसंभवे विकलाभिधानमन्याय्यं तस्मात्संख्याविशिष्टपाशप्रकाशना

सकलेति । प्रकृतौ पक्षेपि कर्मसमवेतस्य संख्याविशिष्टपाशप्रकाशनसंभवेनैकवचनाविवक्षान्याय्या तथा विकृतावपि तादृशप्रकाशनसंभवेन विकलाभिधानमविहृतबहुवचनांतेन न्याय्यमित्यर्थः ॥ एकवचनांता[illegible]कार्यमुखत्वात्कार्यस्य च प्रकृतिवदभिधानस्य क्रमेवरेणासिद्धिरित्याह तस्मादिति ॥१

कौ०प्र

कौ० ७

राम २१

कस्मिन्विकल्पाभिधानं तदाह बह्वीति। द्वयोरपीति। प्रकृतोपाक्षिकस्यैकत्वाभिधानवत्पाक्षिकविकल्पाभिधानस्यापि मंत्रस्यानवलेनशास्त्रार्थ
त्वात्कार्यमुखे नैकवचनांतस्य वबहुवचनांतस्यापि विकृतावतिदेशस्यावर्जनीयत्वात्प्रकृतिवद्विकृतावपि प्रसङ्गे तेनैकवचनांतेन सकला
भिधानं अन्यहितेन च बहुवचनांतेन विकल्पाभिधानमित्याशयः। एकवचनेन शक्यस्यैव तत्राभिधायि बहुवचनम् ... विलक्षणत्याशयेनाह

र्थमेकवचनांतस्यादिनस्यप्रवृत्तिः बहुवचनांतस्य त्वविवक्षितसंख्याकपाशमात्रप्रकाशनेनासमग्रा
भिधानत्वादप्रवृत्तिरिति द्वितीयः पक्षः। द्वयोरपि वोढके नप्रामयोर्थयायथमूहेनानूहेन च विकल्पेन प्रयो
गइति तृतीयः। गह्लीमरत द्वयोः प्रवृत्तिरिति न तु बहुत्वन स्यान्नूहस्तदपि द्वयोरसाधुत्वादूहितव्यं। प्रकृ
तावेकस्मिन्पाशे छंदसि बहुवचनस्य प्रयुक्तत्वात्तथैवांगीकृतं। न त्वेवं द्वयोः प्रयोगः छंदसि दृष्टः। तत्रासमृद्ध
प्रत्ते प्रयोगे सत्यसाधुप्रयोगासंभवात् द्विवचनं प्रक्षेप्तव्यं। तस्मादुभयोरूह इति सिद्धांतः॥ ॥विप्रतिपत्तौ वि
कल्पः स्यात्समत्वाद्गुणेत्वन्यायकल्पनैकदेशत्वात्॥ पशावग्नीषोमीयेपाशमंत्रावेकवचनबहुवचनांतौ।
तत्र बहुवचनांते संदेहः। किं प्रकृतावेवाग्नीषोमीये निविशते उत बहुपाशके षु पशुगणे प्रयुक्ष्यत इति। एकस्मि
न्बहुवचनस्यासमर्थत्वादुत्कर्षप्राप्ते निधीयते। प्रकृत्यर्थस्य पाशस्य विमुक्त्यर्थस्य कर्मणः। उभयोः प्रकृतौ वा
वान्नोत्कर्षस्यावकल्प्यते।१॥ पाशप्रातिपदिकार्थान्वितं विमुक्त्यन्ति द्विकर्मकारकं प्रकृतावपि पाशकर्म तं
कोन्मोचनाभिधानेन संभवन्नोत्कर्षं सहते। संख्यामात्रं त्वसंभवदपि गुणत्वान्न प्रातिपदिकं प्रधानभू
तं कारकं वा लघुकर्तुं। अपेक्षितार्थे हि संख्या पाशकर्माभिधानमात्रेण व्यवहारसिद्धेः। अतो निर्देशमात्रार्थं ब
हुवचनं कर्ममात्रं त्वत्र विवक्षितं। अतो पि न संख्यावशेन मंत्रोत्कर्षः। बहुवचनस्यत्वेकस्मिन्प्रयोगो व य
वबहुत्वादि प्रायेणच्छांदसः॥ ॥अहर्वत्तविकारे प्रदेशात्प्रतीयते॥ दर्शपूर्णमासयोः पत्नीसन्नह्येति
मंत्रः। किमेकद्विबहुपत्नीकेषु प्रयोगेषु सर्वेष्वविकारेण प्रयोक्तव्यः उत द्विबहुपत्नीकप्रयोगयोर्द्विवचन

बहुवचनम... तथैव द्वयोरसाधुत्वादिस्मिन्प्रकृतावप्येकस्मिन्बहुवचनस्यासाधुत्वमाशंक्याह प्रकृताविति। अस्यार्थो बहुत्वमिच्छन्कस्मिन्बहु
वचनमित्यर्थः। नन्वनेनैव स्यात् ... द्वयोरपि बहुवचन ... अस्मदादृशो भ्रेति ... द्वयोर्बहुवचनमि
तिनियमार्थो।

य धाया या नित्य आवयवात्मनो बहुत्वान्चयएवं पत्नीमिति समाम्नानात् एकत्वान्वयदर्शनेन तु सर्वप्रयोगाणां समानविधानत्वेपि द्वि
त्वं मन्त्रे पत्नीमेवाय याश्री हिपदानुरोधेन नयवचने प्रयोगे एवं पत्नीमजोपी साशीको निरस्यति ७ प्रातिपदिकवले नैकपत्नीप्रयो
त्वेकत्वो विवक्षित्वात् संख्या चेति

बहुवचनाभ्यामूहित व्यमिति संशयः। तत्रैकपत्नीके समवेताभिधायित्वसंभवान्नैकवचनमन्याख्यनिगदत्वस्मा
त् द्वित्वबहुत्वयोरूहः। नैतदेवं यद्येकपत्नीप्रयोगाभिप्रायमाम्नानं स्यात्तत एकवचनस्य समवेतसंख्या
भिधानरूपस्य संप्रतिपन्नरूपत्वात्समवेतसंख्याभिधानमिह विवक्षितमेकवचनरूपं मे त्व विवक्षि
तमिति कृत्वा द्विपत्नीके बहुपत्नीके च प्रयोगे समवेतसंख्याभिधानार्थमूह्येत। सर्वप्रयोगाणां तु समा
नविधानत्वात् सर्वाभिप्रायेणेदमाम्नातं द्वयोर्बह्वीषु चैकवचनस्य संप्रतिपत्यभावान्न समवेतसंख्याभि
धानरूपेण प्रयुक्तमिति शक्यमध्यवसातुं निर्देशमात्रार्थं तु एकवचनम दृष्टार्थं चैकत्वमभिधातुं प्रयुक्त
मित्यापद्यते। ततश्च द्विबहुपत्नीके प्रयोगे एकवचनमेव प्रयोक्तव्यमित्यविकारः। नचैकवचनानुरोधेनै
कपत्नीप्रयोगे मन्त्रो नान्यत्रेति वक्तव्यं। पाशवत्प्रातिपदिकवलेन सर्वत्र प्रयुक्तत्वात्। संख्या चाविवक्षितत्वेनानै
कपत्नीकात् प्रयोगान्मन्त्रं व्यावर्त्तयितुमसमर्था तस्मात्सर्वत्राविकारेण प्रयोगः॥ ॥ विकृतौ चापि तद्वचनात्॥
विकृतौ पत्नीशब्दः किं द्विपत्नीकबहुपत्नीकप्रयोगयोः ऊहितव्यो नेति संशये प्रकृतौ द्वयोर्बह्वीषु च पत्नीषु
एकवचनाम्नानसामर्थ्यात्तत्र प्रयुक्तं विकृतौ त्वाम्नानाभावात् द्विबहुत्वयोरेकवचनमसाधुत्वान्न प्रयोक्तव्यं त
स्मादूहः। नैवं निर्देशमात्रार्थमदृष्टार्थं चैकवचनं न तत्समवेतसंख्याभिधानार्थमित्युक्तमतो विकृतावपि तथै
व कर्त्तव्यमित्यनूहः। न चासाधुत्वं द्वयोरेकवचनस्य छांदसत्वात्। पाशे तु द्वयोर्बहुवचनप्रयोगस्य छांदसत्वा राम
भावादसाधुत्वं स्यादिति विशेषः॥ ॥ अध्रिगुः सवनीयेषु तद्वत्समानविधानाश्चेत्॥ तृतीयेध्याये संस्थापशवः २२

x द्वि...

समानविधानादिति सर्वपक्षे समानविधानत्वं यदुक्तं तस्येदं प्रयोजनं सर्वाधिकरणसिद्धमनेन सूत्रेण कथ्य
ते यदा समानविधाना[redacted]स्तदा कथ्या षोडश्यादिषु
द्विबहुपशुकेपि सवनीयगणे प्रवर्त्तमानः प्राप्स्यादित्यध्रिगुप्रैषगतस्यैकवचनान्तः शब्दः पत्नीशब्दवद्देवनो
द्वितव्यः विकारपक्षे तूहितव्यः। ननु समान विधानत्वे यथा प्राप्स्या इति पुल्लिंगनिर्देशात् सारस्वत्यामप्र
वृत्तिस्तथैकवचननिर्देशाद् द्विबहुषु प्रवृत्तिः स्यान्नैवं पुल्लिंगस्य मेष्यामत्यंतासंभवात् युक्ता निवृत्तिरेक
वचने तु प्रतिव्यक्तिगतैकत्वाभिप्रायेण गणेपि संभवान्नात्यंतानुपपत्तिः। पा नितिबहुवचनमिवाव शा० ६
यवाभिप्रायेणोपपन्नमिति नेतव्यं। अपि च जात्याख्यायामेकस्मिन्बहुवचनं बहुषु वैकवचनं स्मर्यते
अतोपि न वचनयोरनुपपत्तिः लिंगं त्वन्यलिंगे स्यंतानुपपन्नमिति वैम्यं॥ ॥प्रतिनिधौ चाविकारात्॥ ५८
श्रुतस्य द्रव्यस्यापचारे नीवारादिषु प्रतिनिहितेषु व्रीहीणां मेधसु मन स्यमान इति व्रीहिशब्दः किमूह्यो
नेति संशये नीवारादिषु व्रीहिशब्दस्यासामर्थ्यादूह्यः प्राप्नोत्युच्यते। यद्भि नीवारा व्रीहिवत्साधनं भवेयुस्त
तस्तत्प्रकाशनार्थं नीवारपदं प्रक्षिप्येत। न त्वेवं। किं तर्हि नीवारगतायै व्रीहित्वंशास्तत्र साधनमित्युक्तं तेच
व्रीहिगता इव नीवार ताः अपि व्रीहिशब्देनैव शक्यं ते प्रकाशयितुमित्यविकारेण प्रयोगः॥ ६८॥ संसर्गि
षु चार्थस्यास्थितपरिमाणत्वात्॥ उपोतिष्ठो मेऽग्नीषोमीये पशावध्रिगुप्रैषः तत्र संसर्गिणोर्थाश्चक्षुरादयः
सूर्यं चक्षुर्गमयतादित्यादयस्ते द्विपश्वादिषु पशुगतेषु किं द्विवचनबहुवचनाभ्यामूहितव्या नेति संश

ये। संसर्गिणां तेजः प्रभृतीनां स्वतः संख्याव्यवहाराभावात् औपाधिको ऽद्व्यवहारः तदिह चक्षुः शब्द
स्य तेजोवचनत्वादसति स्वतः संख्यानासंके धिष्ठानापेक्षत्वे च तयो[illegible]द्वित्वे न द्विवचनप्रसंगात्
पञ्चत्वोपाधिकमेकवचनं। अस्य शब्देन च पञ्चो रूपात्तत्वात्तदुपाधिकमेव विज्ञापयते। अतः पञ्चत्वेदं पञ्चसंख्या
वशेनोह इति प्राप्ते। उच्यते अधिष्ठानान्निर्गतं तेजः प्रदीपप्रभावदेकीभवतीति तदभिप्रायादेकवचनं नत्वौ
पाधिकं न वा धिष्ठानाभिप्रायं चक्षुःशब्दस्तयोः सूर्यगमनासंभवात् द्वित्वात् यमयोरेकवचनानुपपत्ते
स्तस्मान्निर्गततेजोऽभिप्रायं बहूनामपि च पञ्चानां संनिहितानि निर्गतानि चाक्षुषाणि तेजांसि अनेकप्र
23 दीपप्रभावदेकीभवन्ति तस्माद् नोहः॥ ॥एकप्रत्येकसंयोगादभ्यासेनाभिधानं स्यादसर्वविषयत्वात्॥ न
चैवमेकधा स्यत्वं च माघृतादिति श्रूतं। तत्रैकधा शब्दः पञ्चगणे पुरुषमविकारेण प्रयोक्तव्य उताभ्यासेनाभि
कर्तव्य इति संशयः॥ तदर्थमिदं विचार्यते किं प्रकृतो येन प्रकारेणाभिधानं कृतं तेनैव प्रकारेण विकृतावपि
कर्तव्यमुतान्यथापि संभवति। तत्र यद्यपि प्रकृतावेकत्वात् त्वचः साहित्यादभिधानं संभवतीत्येकप्रयत्नसाध्य न ५
त्वमेकधाशब्देनोक्तं नावयवशः आच्छोतां किं त्वेकधा एकेन प्रयत्नेनेति। तथापि विकृता वार्षचोद[illegible]नुग्रह का ४
हायवक्षीनां त्वचां देशातः कालतो वा साहित्यमेकधा गाः पाययतीति वदन्निदं द विकारेणैव त्वगाच्छेदनं प्र
काशयिष्यतीति प्राप्ते ब्रूमः। प्रकृतो यदंशद्वयस्य या दृशोऽर्थो [illegible]रूपितः। तादृगेवातिदेशेऽपि स हि कार्यपरो यतः। राम
कार्यप्रधानो ह्यतिदेशो न शब्दरूपपरः तेन [illegible]प्रकृतमेकप्रयत्नसाध्यत्वं प्रत्येकं त्वचामभिधानमेकधेकधे २३

स्पर त्रिर

त्सेवमभ्यसितव्यं॥ ॥मेधपतिं त्वां स्वामिं देवतस्य समवायात् सर्वत्र च प्रयुक्तत्वान् स्याच्चान्याय्यनिगदत्वात् सर्वत्रैव वावि
कारः स्यात्॥ ॥ तत्रैव वक्ष्यते । उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधमिति । के पुनः चित्तु मेधपतय इ मेधमिति । त
त्र चतुर्द्धा संशयः किमुभयोर्विकृति स्याद् विकारः । उत द्विवचनस्य देवतापरत्वं हः एकवचनस्य तु यजमानपरः । अथ वोभ
योर्यजमानपरत्वं । अथ वोभयोरपि देवतापरत्वम् इति । तत्र मेधपतिशब्देन मेधस्य पशोः स्वामी यजमानो देवताभूतो वा
ग्नीषोमौ उभये प्यभिधीयंते तेन द्विवचनमेकवचनं चोभयमप्यन्याय्यनिगदं तस्मादन्हइति प्रथमः पक्षः सं
भवत्यर्थवत्वे नान्याय्यनिगदता युक्ता तस्मात् द्विवचनांतो देवतावचनस्तेनासौ देवता विकृष्यावूहितव्या एकव
चनांतस्तु स्वामिवचनः स्वामिविकृष्यावृत्ति द्वितीयः एको यं मंत्रः शाखाभेदेन किं विद्भिन्नः समाम्नातस्तत्र यज
मानपरत्वे मेधपतये यो मेधस्तमाशासाना इति संबंधः देवतापरत्वे मेधपतिभ्यां मेधमाशासाना इति नेदमेकस्य स
वाक्यस्य वचनव्यक्तिद्वयं संभवति तस्मादुभाभ्यामपि यजमानस्य देवताया वा नियमेनाभिधानं । तत्र देव
तापरत्वे सत्यग्नीषोमयोर्द्वित्वात् एकवचनमनुपपन्नं स्यात् । यजमानपरत्वे तु द्विवचनं पत्न्यभिधानपरत्वेना
वकल्पते तस्मादाशासाना इत्यपेक्षा भवति तत्र मेधपतिभ्यामाशासाना इत्यपेक्षितार्थस्मरणाय संबध्यते तेन च
यजमानायासा× स्वामिपरावुभावपि स्वामिवशादूहितव्याविति तृतीयः सिद्धांतस्तु मेधमाशासाना इत्यत्र के किमर्थमा×
वाशास्यते तस्यैव हि सः देवताभ्यामाशास्यते तस्माद्देवतावचनं मेकवचनं तर्हि कथमग्नीषोमयोरुभयोर्व्या
सक्तं देवतात्वं तेन देवतात्मनातयोरेकत्वात्तदभिप्रायमग्नीषोमौ देवते तिवत् । द्विवचनं त्वधिष्ठानापेक्षं । तेन द्विव
चनमधिष्ठानसंख्यावशादेकवचनं देवतासंख्यावशाद्विकृतिष्वूहितव्यमिति॥ ॥ नियमो वा बहुदेवते विकारः स्यात्॥

तत्रेति मेधपतये मेधपत्यर्थी यो मेध इति तादर्थ्ये चतुर्थ्येषा [illegible] त्वा आशास्य इत्याद्य वचनव्यक्तेरर्थः देवतापरत्वे तु
तत्संबंध एव वासिद्धत्वादाशास्य इति द्वितीयवचनव्यक्तेरर्थः । तेनोभयपरत्वे वाक्यभेदापत्तेरन्याय्यमित्याह तस्मादिति ७

वैश्वदेवादिषु बहुदेवत्येषु पशुषु द्विवन्निगदस्य मेधपति शब्दे स्याहोऽसंदिग्धः। एकवन्निगदोचित हृदेवो त्येकवच
नांतहा तु निवृत्ते नेऽउताविकारेण प्रवर्त्तत इति चिंतायामेकवचनस्य बहुषसामर्थ्यादूहो देवतारूपैकत्वात्तु प्रकृतिवद
नूह इति सर्वाधिकरण प्रयोजनमात्रमिदमधिकरणं न तु किंचित्सातिपाद्यमस्ति। यद्वोत्तराधिकरणोपोद्घातत्वेन पू
र्वाधिकरणसिद्धमेवानुकीर्त्तितं॥ ॥अर्थांतरे विकारः [illegible]वता पृथक्त्वादेकाविसमवायात्स्यात्॥ आग्नेयः कृष्णग्री
वः सारस्वती मेषी बभ्रुः सौम्य इत्यादिषु पशुगणेषु किमेकवन्निगदस्याविकार उत विकार इति संशये। गणे त्रिपा
येण सर्ववदन्नूहं मन्वानस्योत्तरं। देवतात्मन एकत्वादविकारः पुरोदितः। तद्वपशस्य तु छिन्नत्वे कोनामोहं निवार
२५येत्॥ ॥इति श्रीशास्त्रदीपिकायां नवमस्याध्यायस्य तृतीयः पादः॥ ॥षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृति
त्वाद्गुणस्य प्रविभक्तत्वादविकारो हि तासामकार्त्स्न्येनाभिसंबंधो विकारान्नसमासः स्यादसंयोगाच्च सर्वाभिः॥ \\
तत्रैव। षड्विंशतिरस्य वंक्रय इति श्रुतं तद्धि पश्वादिषु पशुगणेषु चोदकप्राप्तं यथासंदिह्यते। किं षड्विंशतिर
स्येत्येषु त्रयपदाभ्यासः। उताविकारेण प्रयोगः। उत षड्विंशतिपदगतमेकवचनं द्विवचनबहुवचनाभ्यामूहि
तव्यमथवा स्येत्येतत्पदमस्यासिर्ताव्य माहोस्वित्सर्वपशुगतावंक्रीः समस्यतासामि[illegible]व क्तव्येति। तत्र षड्विं
शति संख्यायात्रस्य पदाभिधेयस्य पशोर्यः संबंधस्तत्प्राधानमिदं वाक्यं। ततः प्रति पशुतत्संबंधं प्रकाशयितुं
षड्विंशति पदमस्य पदं चाभ्यसनीयं त्रय मेवात्र प्रधानतः पूर्वपक्षः। इतरे तु संरुवमात्रेणोपन्यस्य दूष्यंते॥
तत्र द्वितीयः पक्षः अकरणाभ्र तो यमदृष्टार्थो मंत्रः तस्माद विकारः। तृतीयस्तु यद्यप्यकरणं तथापि विशामि
हत्याम न्यूनावदानोद्धरणाय पार्श्वयोः साकल्यं स्मारयन्न पार्श्वं स्वजन्न षड्विंशतिसंख्याप्राधान्येन प्रकाश्या

तेनह्वयोः पश्वोः षट्त्रिंशतिसंख्यांप्रकाशयितुं षट्त्रिंशतीअनयोर्वंक्रय इति। ननु षट्त्रिंशतिशब्दे संख्याप्रधाने संख्ये
येषु [illegible] वंक्रीषु षष्ठी स्यात्सत्यं यथाग्निहोत्रे वंक्रीणां प्राधान्ये संख्याशब्दस्य लक्षणया सामानाधिकरण्यं
तथा संख्याप्राधान्ये वंक्रिशब्दो लक्षणया संख्यासामानाधिकरण्यं प्राप्स्यते। चतुर्थस्तु पशुप्रधानमिदं। सं
हितेचोदितः। संख्यात्वचोदिता तस्मात्पश्यंतादिधेयः पशुरेवात्र प्रधानं तद्विशेषणं संख्या वंक्रयस्त्वषट्त्रिंशति
वंक्रिकोयं पशुरिति। तत्रश्चैवैकं पशुं भेदेन प्रकाशयितुमस्य पदमभ्यसितव्यं। सिद्धांतस्तु। वंक्रीयत्ताप्रकाश्ये
हपार्श्वसाकल्यसिद्धये। ताइति प्रतिनिर्देशादपि तासां प्रधानता।१। वंक्रयोत्र प्रधानं ता एव षट्त्रिंशतिशब्देन यत्त
याप्रकाश्यंते अन्यूनयोः पार्श्वयोरवद्यतोतिवचना। यद्यपि पशुश्चोदितस्तथाप्यसौ हृदयाद्यवद्वारेणैव साधनं
नसाक्षादितिवक्ष्यामः तस्मात् वंक्रयः प्रधानं तथा च ता अनुद्येश्याश्चावयतादिति तासामेवोक्तस्त्र प्रतिनिर्देशाउद्दृ
रणं चोच्यते। पशुप्राधान्ये हितमितिस्यात्। संख्याप्राधान्ये तामिति तस्माद्वंक्रीयत्तापरत्वात्समस्यासन्निधानं। ननु
यद्यपि वंक्रीयत्तापरमिदं तथापि प्रतिपशुभेदेन वंक्रीणामुद्देशाद्भेदेनैव पशोर्वंक्रयइयत्तया वक्तव्या इति षट्त्रिंश
तिपदाभ्यासस्स्वन्याय्यस्तथा चाश्वलायनादयो यत्रास्तु त्रकाराम न्यंते। नेति भगवान् जैमिनिः। सहिमन्यते य
थैव प्रकृतौ द्वयोः पार्श्वयोस्त्रयोदशसु त्रयोदशसु वंक्रिषु पृथक्पृथगुद्दीयमानास्वपि समस्तानामेवेयत्तो
क्ताषट्त्रिंशतिरस्य वंक्रय इति तथा विकृतौ षट्सु द्वारत्ने दमतंत्रीकृत्य प्रयोगसमवेत समस्तवंक्रीयत्ता मंत्रेण
प्रकाशयितव्या तस्माद्द्विपंचाशदनयोर्वंक्रयो ष्टसप्ततिरेषां वंक्रयइति समस्तासन्निधानमेवन्याय्यं॥ ॥अश्व

नाप्यरु.मतोत्र कोटिक मेक मेवाधिकरणं किमभ्वस्य वैशेषिकी अगेव.तपरगोमृगयोः समासः उतनेव वैशेषिकी अक द्विगुमा हू नएवा
ध्रियुरन्यः षट्त्रिंशतिशाइ वानम्येः इतरयोः सर्वदसुमासेनान्यो द्विगुः किं वा सर्वधामेव समास इति। आद्यएवं पक्ष सन्ने वेदइगिनस्त्र क्षिप्याह
तत्रेति। तदेतदेव मं. वैशेषिकवचने रिएवं पक्षितसमास एवेति चसिद्धां तिनेवशेषिकवचनं नेति सिद्धांतो वाच्यः तत्रो न्याय्य प्रकरणोपा
स्यचेतुस्त्रिंशत स्य वचनाद्वैशेषिकं॥ अश्वमेधे श्रूयते अश्वस्तूपरो गोमृगस्ते प्राजापत्या इति त अश्वस्य चतुस्त्रिं
शद्वं क्रय स्तत्र वैशेषिकोमि [illegible] त्रः पठितः चतुस्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्वस्य स्वधितिः समेतीति। त
त्रेदं वचनमाम्नतिन चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति। तत्र भाष्यकारोऽश्वस्य चतुस्त्रिंशदित्येवमादि
सूत्रं पंचकमेकाधिकरणत्वेन व्याख्यातवान्। वार्त्तिककारस्त्वेतत्सूत्रं पृथक् कृत्य प्राप्तिसूत्रत्वेनाधिकरणांतरत्वे
नव्याख्यातव्यमित्युक्तवान्। तत्राधिकरणांतरमेवं द्रष्टव्यं। वैशेषिकाम्नवः प्रतिषेधोयं न चतुस्त्रिंशदिति। ब्रू
हूतमेवेति। तत्र पाठप्राप्तं वैशेषिकं गिरापदं वत्सत्यक्षवचनबलान्नित्यवद्बाधित्वा प्राकृतमेवाध्रिगुवचन
गिरापदं व सर्वदा वक्तव्यमितिप्राप्ते ब्रूमः इरापदं हि प्रत्यक्षेणावचनेन गिरापदस्थाने विहितं युक्तं यत्पाठ
प्राप्तं वैशेषिकं गिरापदं बाधते तस्मिन्बाधितेनुवादएव गिरापदं प्रतिषेधं नत्वेवमिद षड्विंशतिरित्येव
ब्रूयादित्येवकारोपहतविधिशक्तित्वात्कृतस्य विधौ समर्थः। अतोत्र न चतुस्त्रिंशदित्येव प्रतिषेधं विध
ते। तस्मिंश्च प्रतिषिद्धे षड्विंशतिरित्येव ब्रूयादिति चोदकप्राप्तानुवाद एव। न त्वेवं गि[illegible]रापदप्रतिषेधा 25
दिरापदं प्राप्नोतियेनान्यथेत तस्यापि विधौ वाक्यभेदः तेते नं त्रेरापदविधिरेव वाक्यार्थः। इह तु प्रतिषेध एव विधे
यः स च प्राप्तिपूर्वकः प्राप्तिश्च न शास्त्रमंतरेण संभवतीत्यतो वश्यं वैशेषिकवचनस्य प्रापकं प्रकरणपाठमनुमि रामं 25
तं वा कल्पलाघवाय काममंगी क्रियतां अंगीकृते चास्मिन्नुभयोर्विधिप्रतिषेधयोः शास्त्रत्वाविशेषाद्विकल्पः
मितिदश्चिरोधश्चउत्तरसूत्रे चतुश्रद्वाशद्वचारत्वा न प्राप [illegible] तंत्र ममाप्तिस्स मतत [illegible] तायोरिवैशेषिकवचन
प्राप्नोति नियतत्वादुतानियते तिविचारोत्र [illegible] तेन न्याय्य सांशयनाद्यवोर्निंकितिवैशेषिकवचनप्राप्तावपि विचारएवेयस्स
योः संभवाद्विचारे तत लिन

एवकारस्य विधिप्रतिबंधकत्वमुपपादयति एवकारेति। एवकारस्योपपदानर्थक्या नन्वर्थो न्यनिवृत्तिर्विधेया· कुतो न्यादित्यपेक्षायां अन्यश
दार्थप्रतियोगिसमर्पणेनैवकारस्य समर्थित्वात् तत्पदस्यार्थ एवकारार्थविशेषणं भवती त्युपसर्जनत्वेन नैतस्य स्वयं विधिर्न्नान्वीयतइत्यर्थः तत्रेदमा
नर्थक्यं कर्त्तव्यतयोरेवकारार्थविशेषणत्वमुक्तं तत्र दर्शितेन षड्विंशतेः तत्र विधिविशिष्टस्य विशेषणत्वेन विशेषणविशेष्ययोरुभयोरपि विशेषणत्वाद

तस्माद्वैशेषिकवचनमपि कर्त्तव्यं॥ ॥ तत्प्रतिषिध्यप्रकृतिर्निर्युज्यते सा चतुस्त्रिंशद्वाच्यत्वात् तत्रैव संशयः। किं
मश्वस्य पठितमेव चतुस्त्रिंशद्वाक्तिनद्गतिवैशेषिकं कर्त्तव्यं उत प्राकृतमपि यदि प्राकृतं तदापि किंतु परगोमृगयो
रश्वस्य च समस्य वचनं षड्विंशतिरेषां वंक्रय इति उत तत्परगोमृगयोः सामासिकं वचनं कृत्वाश्वस्य षड्विंशति
रस्य वंक्रय इति एवमयथार्थमधिगुवचनं कर्त्तव्यमिति। तत्र न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादि
त्यनेन पठितो याम वर्त्तिगिरापदव चतुस्त्रिंशदितिपदं प्रतिषिध्य षड्विंशति पदं मिरापदवन्निक्षिप्यते न त्वयं
समाम्नातायाश्चः प्रतिषेधस्तस्मात् सेवषड्विंशतिपदयुक्तावक्तव्येतिचोदकप्राप्ताधिगुवचनस्य निवृत्तिरिति
प्राप्तउच्यते। एवकारोपबद्धत्वान्न षड्विंशतिचोदना। चतुस्त्रिंशन्निषेधे वचनानुवादोस्य संभवी। अश्व एव निषेधा
तस्तथा सतिच चोदकात् प्राप्तं षड्विंश तिरिति ब्रूयादित्यनुकीर्त्यते। न चतुस्त्रिंशदिति ब्रूयात्षड्विंशतिरित्येव
ब्रूयादित्येकमिदं वाक्यं तेनैकोत्र विधिरितरोनुवादः तत्र यदीरापदवत् षड्विंशतिर्विधीयेत ततश्चतुस्त्रिंशत्प्रतिषेधो
गिरापदप्रतिषेधवदनूद्येत न तु तत्र षड्विंशतिपदमिरापदवत्कं पं विधातुं एवकारोपबंधात् एवकारार्थविशेषणं
हि ब्रूयादिति न स्वयं विधिक्षममेव कारार्थश्चनिवृत्तिस्तस्मात् षड्विंशतिपदव्यतिरिक्तस्य निवृत्तिरिह विधीयते एवं
रूत्वोद्वेयमिति तु शङ्कोतिविधत्तुमिति विशेषत्तेन चतुस्त्रिंश [illegible] प्रतिषिद्धे त्र विधीयते तद्यदि पदमात्रं
प्रतिषिध्येत न षड्विंशतिपदमनुवदितुं शक्यते शास्त्राभावात्। न हि पठितायां न्यचि चतुस्त्रिंशत्पदे प्रतिषिद्धे ष
ड्विंशतिपदस्य प्राप्तौ प्रमाणमस्ति। तस्मात्समस्ताया ऋचः प्रतिषेधः तथा सति हि षड्विंशतिरित्येव ब्रूयादि

न्यक रा वा हि नो रथा इत्यादौ मूर्द्धो वा धिनया प्रसिद्धस्य कशशब्दस्यैकदेशः कशाब्दः उरूशब्दो विस्तीर्णवचनस्तत्र करणे धारयो
वाप्य यक्पदलोपः वा दीर्घत्वं छांदसमिति भाष्य उक्तं

स २

ति चोदकप्राप्तत्वात्संख्याया अनुवादः। शक्नोति च चतुस्त्रिंशदिति प्रतीकग्रहणेन चं प्रतिषेद्धुं गिरा पदेन लवनाद्य त्वा
द्गुहणं न शक्यमिति वेद्यम्। द्वितीयं सर्वपक्षेवादित्याह। प्राकृतेऽपि वचने क्रियमाणे षड्विंशतिरिति ब्रूयादिति व
चनादेवमेव वक्तव्यमभ्रेनसमस्य वचनमिति। तदिदं मंदं न ह्यनेन षड्विंशतिपदं विधीयते चतुस्त्रिंशन्निषेध
परत्वात्तद्वाक्यस्यैवेदं शब्दोपबंधा च्चाशक्यमिदं विधातुमित्युक्तं। तस्मादेषोऽत्र वाक्यार्थः। न चतुस्त्रिंशदिति प
ठितं ब्रूयात् किंतु यथाप्राप्तमध्रिगुवचनमेवेति। तस्मात्समस्यवचनं। पक्षे च वैशेषिकमूरगवचनं॥ ॥ वनि
ष्ठुसंनिधानादूरूकेणवपाभिधानं॥ वनिष्ठुमस्य माराविष्टेरूकं मन्यमाना इति क्रिमुरूकशब्देनोलूकस्याभिधा
नं तत्सादृश्यबुध्या वनिष्ठोर्लवनं प्रतिषिध्यते उत वपाभिधानं उरूकशब्दः वपोद्धारणकाले वपां मन्यमाना व
निष्ठुं माराविष्टेति। तत्र रलयोरेकत्वात्त्वादुलूकाभिधाने प्राप्ते। ब्रूमः। न तावद्वनिष्ठोर्लूनं त्वस्य लवनं शक्यं वि ७
निषेद्धुं सादृश्यबुद्धिनिषेधस्यादृष्टार्थत्वात्तस्मादवयवव्युत्पत्त्या वपाभिधानं। दर्शिता चावयवव्युत्पत्तिर्लोष्ये व ६
वपोद्धरणकाले संनिधानाद्भ्रांत्या वनिष्ठोर्लवनं प्रसक्तमाशंक्य तन्निवारणार्थं वचनं दृष्टार्थं भवति। तस्मा 26
द्वपाभिधानमिति वपाविद्वद्धावृद्धः॥ ॥ प्रशासाऽस्याभिधानं॥ प्रशसा बाहू कृणुतादिति किं प्रशसेति तृतीयांत
मस्याभिधानं प्रासिना बाहू छेत्तव्याविति उत द्वितीया द्विवचनस्याकारादेशे छांदसे च तकारलोपे कृते प्रशंसा
वचनीयमिति। तत्र शसशब्दस्यासौ प्रसिद्धत्वात्तद्वचनं मन्यते। न स्वधितिसाधनकेछेदने शक्यमसेः करणत्वं राम
प्रकाशयितुं॥ मात्र वार्त्तिकद्व्यकल्पनायां चातिगौरवं। तस्मात्प्रशंसावचनत्वं प्रशस्तौ बाहू कृणुतादवि २६
न त्व श्वमेधे शते यज्ञा हरिते स्वर लोसयदिति पश्यम न्नसमा न्य संबंध प्रमाणाभावे नाध्रिगौ षोडश मत्या प्रकृतिनि
विष्टतरत्वाग्रयोगवाचस्पत्यसाचा तुत्कर्षे सति मे त्रवणो रसः सांघ नत्वस्यादत आह मां त्रेति। मांत्रेवार्णिकासिनाक्रूति विद्धत
स्या चिनेत्व घिकम्या घट रो

शालाकाकारं ६

कल्लाविल्यर्थः एवंदृष्टार्थतान्नविष्यतितस्माद्धादुविरुद्धावूदुः ॥ ॥ श्येनशालाकुस्पपकवशोरूस्त्रेकप
र्लोषघ्कृतिवचनंप्रसिद्धसंनिधानात् ॥ श्येनमस्यवक्षः रुणुतादिति श्येनसदृशमित्यर्थः तत्र संशयः किं
सादृश्यमेवात्रविवक्षितंउतसाकल्यमिति । तत्रसादृश्यमेवामीपिष्टपिंडाः सिंहाः क्रियतामितिवत् विधी
यते तेन वक्षउद्धृत्यकर्तनाद्युपायेनपक्षचरणचंच्वादिसंपादनेनश्येनसंस्थानंकर्तव्यं । नैतद्युक्तं । अदृ
ष्टार्थताप्रसंगात्कर्तनेचवक्षसोवैकल्यात् विविनाशःस्यात्सा कल्पमत्रविधीयते अविकलंहि वक्षः श्येन
सदृशंभवतितदनेनप्रकारेणवैकल्यमेवोच्यतेदृष्टार्थत्वात् । एवंशालादोषैणीकश्यपेवां सौकवक्षो बाहू ५
रूस्त्रेकपर्णीष्वीवंतेल्यपि साकल्यमेव ॥ ॥ प्रासंगिकेप्रायश्चित्तंनविद्यते परार्थत्वात्तदर्थोहि विधीयते ॥
अग्निहोत्रेश्रूयतेअग्नयेज्योतिष्मतेपुरोडाशमष्टाकपालंनिर्वपेद्यस्याग्निरुद्धृतोऽदुतेऽग्निहोत्रे
उद्वायेदिति । तत्रसंशयः यदादर्शार्थेनोद्धृतोग्निरग्निहोत्रकालेउद्वातिकिंतदाज्योतिष्मतीष्टिः कर्तव्या
नवेति तदर्थमिदंविचार्यते किमग्निविशिष्टोद्वाननिमित्तमिदंकर्माग्निहोत्रस्याराद्दुपकारकंउतोद्वानपरा
ताग्निनिमित्तंतस्यैवाग्नेरुत्पादकंसामवायिकमिति । किंप्राप्तंउद्वायेदितिलिङ्‌क्तयाधात्वर्थस्यनिमि
त्ततां । वदत्यग्नेस्तुवाक्येनतस्मादाराद्दुपक्रिया । १। यदाहिवाक्यगम्याग्निनिमित्तत्वतिरस्कारेणपद
स्कत्योद्वानस्यनिमित्तता । ततउद्वानस्यकर्तनंगतेनासंर्क्यत्वादग्नेस्तुविशेषणत्वेनकार्यान्वयान्ना
वादाराद्दुपकारकत्वमेवेति । निमित्तस्यचप्रकरणेनविशेषणासंभवाद्दर्शार्थस्याप्युद्धृतस्याग्नेरुद्वा

सन्निपत्योपकारकं ४ अदृष्टद्वारोपकारकं ५

ननु दर्शार्थमुद्धृतस्याहवनीयस्याग्निहोत्राङ्गत्वात्तदुत्पत्त्यर्थोपि सति स्थिरग्निहोत्राङ्गमेवस्यादिति कथं दर्शार्थमुद्धृतो द्वानेन भवती त्याशंक्याह अग्निहोत्रतिदर्शार्थोद्धृतो ह्याहवनीयत्वमात्ररूपेणाग्निहोत्राङ्गं नोद्धृतत्वरूपेण इष्टौ तु उद्धृतत्वरूपेण साधकता उद्धृतस्य अतो यस्योद्धृतत्वरूपेणाग्निहोत्राङ्गता तदुत्पत्त्यर्थं वसतीयमिष्टिरग्निहो ×२।४× त्राङ्गस्यातदर्शार्थं चोद्धृतो नोद्धृतत्वेनरूपेणाग्निहोत्राङ्गं किं
नेसंजातं निमित्तमिति कर्तव्येष्टिरिति प्राप्ते ब्रूमः। उद्धानस्याग्नियुक्तस्य नित्यत्वान्ननिमित्तता। नचतस्याग्नि
नाव्याप्तिः कदाचिदपि विद्यते।१। अग्निसंबंधेस्तावदुद्धानपर्यायस्य विनाशस्यावयवशः सर्वदा विद्यमा
नोन्न निमित्तं भवति। नच विनाशस्य चिंतितनिमित्तादिषु सर्वदा वर्त्तमानस्याग्निनाव्याप्तिः संभवति यो
निमित्तं स्यादुद्धानपरीतस्यत्वग्नेनिमित्तता युक्ता। क्वचित्कीदृते नाग्नेर्व्याप्तिर्नतु सदातनी। यद्यप्यग्ने
रुद्धानसंबंधो नित्यः तथापि व्याप्तिरनित्याते नाग्निरेवात्रोद्धानव्याप्तो निमित्तं तस्योद्धानपरीतस्य कार्य
योग्यस्योत्पत्त्यर्थेयमिष्टिरग्निहोत्राङ्गमग्निहोत्रार्थस्य चाग्नेरुद्धृतस्योत्पादनं कुर्वती अग्निहोत्राङ्गं स्या
प्राप्त ७ त नान्यार्थस्य। तस्माद्दर्शार्थेनाग्नावुद्धृतउद्धाते नेतत्प्रायश्चित्तं॥ ।धारणेवपरार्थत्वात्॥ इदमाम्नायते
धार्योगतश्रियआहवनी यद्द्रीति तत्र यद्ध्रियमाणोग्निरग्निहोत्रकालउद्धातितदा किमिष्टिः कार्या उत नेति
27 संशये। अग्निहोत्रार्थे उद्धाते प्रायश्चित्तमिदं स्कृतं। धार्यस्य चास्तिता दर्थ्यं सर्वार्थं धार्यते ह्यसो।१। सर्वक
र्माणां धार्यमाणोग्निः प्रत्येकमंगमतोग्निहोत्रार्थता प्यस्तीति तदुद्धाने कर्तव्येष्टिः नैवं॥ अन्यार्थमुद्धृ
तो ह्येष गतश्रीत्वेन धार्यते। धारणस्य निमित्तं तन्नोद्धारस्याकृतत्वतः। न हि गतश्रीत्वेन पुरुषस्याग्न्युद्धृ
रणं कृतं येनो द्धरणमुद्धृतो वाग्निः सर्वार्थः स्यात् किंतु धारणमात्रं। तेन यद्यायं किंचित्कर्मविशेषम
धिकृत्याग्निमुद्धरति तदा तस्य धारणमात्रं गतश्रीत्वेन करोति यस्मिंश्च कर्मण्युपसंप्राप्ते ग्निरुद्धृतस्त
दर्थमेवोद्धरणं उद्धृतश्चाग्निस्तदर्थ एवनिमित्तवशाद्धार्यमाणः प्रसंगादग्निहोत्रस्योपकरोतीति न तदु राम २७
अतो यथाद्वितीयेयदिदर्थं तरसामासोमस्यादिसत्रान्ययोगव्यारव्यासोमविशिष्टस्यपर्यंतरस्य निमित्तत्वं सिद्धोतितं एवमिहापी त्याह
×१रमतरविशिष्टस्य कृतो निमित्तत्वा तस्य ... विपरीतं ... सम्य अन्ययोगव्यारव्यास।१× १तेनेति
... विशेषायदधी तरस्य निमित्तत्वमेवउद्धृतस्य तु निमित्तत्वं नाप्यसमपि॥

ह्वानेष्वापश्चितं॥१॥ ननूत्पन्नेयस्य चोदनाप्राप्तकालत्वात्॥ दर्शपूर्णमासेऽभ्युद्धरणे किमग्निहोत्रांगभूतउद्धरणे
मंत्रोवाकालाहोत्रेत्यादिः प्रयोक्तव्यो नेति संशयः तत्र। दर्शार्थेऽभ्युद्धृते वह्नाव ग्निहोत्रं प्रवर्त्तते॥ साधनत्वप्रयुक्तश्च
धर्मो नांगमपेक्षते। तेनाग्निहोत्रानंगभूतेऽभ्युद्धरणे तदुपकारकत्वमात्रेण यागार्थयोर्दधिपयसोः प्रणीताध
र्मा इव कर्त्तव्य एव मंत्रः कालमनादृत्य। कालस्य गुणत्वेनासंभवेपि मंत्रस्यालोपो न्याय्यः। अथवोद्धरणमप्येतदग्
ग्निहोत्रस्यांगमकालेपि क्रियमाणमन्यथाग्निहोत्रस्य प्रणायनलोपापत्तेः गुणं पश्यामीति प्राप्त उच्यते। कालो
खल्वनुपादेयः प्राप्तेकर्मविधीयते। सांगं तस्मात्तु कालात्प्राक् नाधिकारोस्ति कर्मणि॥१॥ अनधिकारिणा व
क्रियमाणं निष्फलं स्यात्तस्मान्नाप्राप्तेकालेऽग्निहोत्रांगमुद्धरणं तन्मंत्रो वा कर्त्तव्यः॥ ॥प्रदानदर्शनं श्रपणे
तद्धर्मनोदनार्थत्वात् संसर्गाच्च मधूदकवत्। आदित्यः प्रायणीयः पयसि चरुरित्यत्र संशयः किमेतत्पयश्च
रुणां तुल्यं तद्देवतासंबंधि प्रदेयत्वेन विधीयते। ततश्च प्रदेयधर्मैर्वत्साकरणादिभिः संबध्यते। उत चरो
रेव श्रपणार्थं प्रणीताकार्ये विधीयते ततश्च न प्रदेयधर्मान्लभेतेति। तत्र। चरोर्द्देवतया योगं पयसा चरुसं
गतिं विदधत् भिद्यते वाक्यमर्थद्वयविधानतः। द्रव्यद्वयविशिष्टदेवतासंबंधविधौ त्वेकार्थविधानं तस्मात्प
यः प्रातिपदिकार्थोपि देवतासंबंधी। सप्तम्यर्थस्तु सहश्रपणादर्थसिद्धो नूद्यते अभ्युदितेष्टिवत् इति प्रा
प्ते ब्रूमः। चरुणाधारभूतेन पयसा च विशेषितः। द्रव्यदेवतसंबंधएकोर्थोत्र विधीयते। पयस्यादित्यश्चरु
रित्युक्ते यविशिष्टद्रव्यदेवतासंबंधविधाने नास्ति वाक्यभेदः। तत्र चरुः प्रथमानिर्देशाद्गुणः पयस्तु सप्त
मीनिर्देशादाधारत्वेन संबध्यते एवमवाक्यभेदे सति सप्तमीनिर्देशस्याविवक्षामंगीकृत्य तुल्यकल्पत्वमयु

सर्वपक्षे सर्वसिद्धांते नाहृद्धीनिः इहापि षष्ठे चरुत्वदेवतात द्विशेषणादधिसृताधिकरणत्वविधिनिमित्त वाक्यभेदो द्वारो का चपिद्रव्ययोः
त्वाच्चतुभयोर्दर्शने केवलमाविधो वाक्यभेदस्य विशिष्टविधिनैव परिहर्त्तव्यत्वाद् दधिसृतत्वयोराधिकरणत्वान्न प्रदेयत्वापूर्वो व द्रिसाश्रयः॥

29

क्रमभ्युपगंतुं तस्मान्न पयसि प्रदेयधर्माः॥ ॥अभ्युदये दोहापनयः स्वधर्मा स्यात्प्रवृत्तत्वात्॥ अभ्युदये
ष्टावपि यस्य विष्णास्ताविंद्राय प्रदात्रे दधि चरुं येणि ष्णास्तान्विसृवेशिपिविष्टाय शृते चरुमिति दधि शृतयो
: सप्तमी निर्देशात्पूर्वकस्य देयधर्मा न कर्त्तव्या इति प्राप्तं तत्रोच्यते नापूर्वकर्मविधानाद्दतेने कार्थे विधिः सं
भवति न चेहापूर्वकर्मविधिः किंतु सर्वप्रवृत्तदर्शकर्मणि निमित्ते पूर्वमेवापनीतानां हविषां देवतांतर संबंधमा
त्रं विधीयत इति स्थितं षष्ठे तद्य दि तंडुलानां देवतांतर संबंधे दधिमृतयोश्चप्रणीतार्थे विधिः स्यात्ततः प्रा हेक
र्मणि अनेकार्थ विधानाद्वाक्यं भिद्यते न तस्मात्प्रदेयत्वे नैव प्रवृत्तयोर्दधि शृतयोर्देवतांतर संयोगमात्रं तंडुल
वद्विधीयत इति कर्त्तव्याः प्रदेयधर्माः॥ ॥अपनयो वार्थांतरे विधानाच्चरुपयोवत्॥ यः पशुकामः स्यात्सो मा
वास्यामिष्ट्वा वत्सानपाकुर्यात् ये मध्यमास्तान्विसृवेशिपिविष्टाय शृते चरुं येस्थविष्णास्ताविंद्राय प्रदात्रे द
धंनी रुमिति शृतं तत्राभ्युदये पितुल्यश्रुतिलात्तद्वदेव दधि पयसोः प्रदेयत्वं मन्वानः प्रदेयधर्मा मन्यते। अ
पूर्वकर्मविधानादप्राप्त प्रदानयोर्दधिपयसोः सप्तम्या अपणार्थमादित्यचरुपयोवद्विधानमित्यकर्त्तव्याः प्र
देयधर्माः॥ ॥अपणानां पूर्वार्थत्वात्प्रदानार्थे विधानं स्यात्। ज्योतिष्टोमे श्रूयते पयसा मैत्रावरुणं श्रीणा
ति ऋजिर्मथिनामित्यादि तत्र संशयः किं पयः प्रभृतयः [illegible] प्रदेयत्वेन सोमवद्विधीयंते तत श्च प्रदेयध
र्माः क्रयादयः कर्त्तव्याः उत सोमसंस्कारार्थत्वेन विधानादकर्त्तव्या इति तत्र पयसा सोमस्य मिश्रणं श्रूयते किम
र्थं कथं नु नाम सोमे प्रदीयमाने पयोपि प्रदीयतेति। एवं द्वियागनिर्वृत्तिर्दृष्टमेव प्रयोजनं। सोमसंस्कारार्थत्वे तु
अदृष्टार्थता स्यादिति एतावता प्रदेयत्वं मन्यते। द्वितीयया प्रधानत्वं सोमस्यावगम्यते। तृतीयया च ता द
र्थ्यभेदापत्तिरित्याह नयदीति। न नु दधि [illegible] वाक्यभेद इत्यत आह तस्मादिति। पूर्वे
दधिसृतत्वयोर्यागान्वयो वाच्यो लोकि कयोश्चविधेयः सप्तम्यर्थश्चानुवादतयाप्युपपद्यमानो विधेय इत्यसति गौरवे तेदृ
भा.व.:१

र्थ्यं पयसः प्रतिपाद्यते ॥१॥ मृत्त्वे चादृष्टसंस्कारकल्पनानैव दु[illegible]ति । तस्मात्प्रदेयधर्माणां न पयः प्रभृतौ क्रिया ॥
॥२॥ ॥ पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानाद्वत् ॥ अश्वमेधे ईशानाय परस्वत आलभन्त इति प्रकृत्य श्रूय
ते पर्यग्निकृतानारण्यानुत्सृजन्तीति । तत्र संदेहः किमीशानायालभन्त इत्यालंभमात्रं विधीयते तेषां चालब्धानां
पर्यग्निकरणविशिष्टउत्सर्गस्त्यागः पर्यग्निकरणवाक्येन विधीयते उत ईशानायेति यागविधिः पर्यग्निकृ
तानारण्यानुत्सृजन्तीति तत्रैव गुणविधिरिति । नत्र सत्यपि देवतासंयोगेन यागविधिरालंभमात्रं तु विधीय
ते यागविधित्वे सति पर्यग्निकरणवाक्ये । न किंचिद्विधेयं लभ्येत । न तावदुत्सर्गः यागविधिनैव प्राप्तत्वान्न प
र्यग्निकरणं चोदकप्राप्तत्वात् । न पर्यग्निकरणोत्तरकालउत्सर्गस्तस्यापि प्राप्तत्वात् । न पर्यग्निकरणा
नंतर्यं आनंतर्यशब्दाभावात् । न चवक्तृतोपकारपर्यग्निकरणविधानाद् सर्वत्वेन स्वत्र पर्यग्निकरणं
विधीयते सिद्धवदुपसर्जनीभूत पर्यग्निकरणनिर्देशात् । न च पर्यग्निकरणं तागरीति विधिः प्राप्तत्वादेव । न
च ततः परेषां पदार्थानां प्रतिषेधः तच्छब्दाभावात् । न च पर्यग्निकरणकाल उत्सृजन्तीति विधिः कालस्याश्रु
तत्वात् । कालविधौ तु कालान्तरं निवर्त्येतनां गान्तराणि तत्र चोदकप्राप्तसमस्ताङ्गयुक्त उत्सर्गः पर्यग्निकरण
काले कथमनुष्ठातुं शक्येत तस्मादालंभमात्रं देवतोद्देशेन सर्ववाक्ये विधीयते परस्वतां ॥ उत्तरवाक्ये तेषामु
त्सर्गः पर्यग्निकरणविशिष्टश्चोद्यते । उच्यते । विना यागेन न द्रव्यं देवतान्वयमर्हति । द्रव्यदेवतसंयोगाद्यतो या
गो विधीयते ॥३॥ ईशानायेति देवतालिंगं गम्यमानमशक्यमपह्नोतुं तच्च न कथंचिद्यागमंतरेणालंभमात्रादुपप

उत्सर्जनिनादेवतोद्देशेन हितः स्वत्वत्यागो वा यागो वा तद्विषयकव्यापारोपरमो वा इति विकल्प्याद्ये आह यदीति। न चेति यक्षि
यो स्वित्वत आह असतीति। तस्य हि यागक... कस्तद्विवक्षायां लुटुलिङ्क्तो यागस्यादित्यर्थः। द्वितीय आह अभेलादिना। तृतीय
येते अतो यागविधिः विहिते चैतस्मिन् यदि पर्यग्निकरणवाक्यस्य विधेयं न लभ्येत ततो नुवादो न वक्तुं न चेता
वता देवतासंबंधज्ञानमप्रमाणिकं तु शङ्क्यं न च नास्ति विधेयं अपूर्वतापरलात् तुकुलोपकरणकृतपर्य
ग्निकरणं तां गरीति विधीयतेतया प्रत्यक्षविहितया निराकाक्षइत्याशङ्क्य न प्रयोगवचनो न चोदकमपेक्षते तत
स्माद्यागविधिः उत्तरं तु तत्रैव गुणविधिः॥ ॥आज्यसंस्थापतिनिधिः स्याद्द्रव्योत्सर्गात्॥ ॥ लाङ्गूलं पात्नीव
तृ ५ तमालभेतेति प्रकृत्य पर्यग्निकृतं पात्नीवतमुत्सृजतीति तत्र पुनः श्रूयते आज्येन शेषं संस्थापयतीति। तत्र संश
यः किं पूर्वस्मिन्नेव कर्मणि पशोरुत्सृष्टस्य स्थाने प्रतिनिधित्वेनाज्यं विधीयते किं वा कर्मान्तरविधिरिति।
29
तत्र शेषशब्दात् संस्थापयतिशब्दाच्च तत्रैव प्रतिनिधिविधिः न कर्मान्तरं देवतान्तराभावात्। ननु पर्यग्निक
रणं तां गरीति विधानमित्युक्तं सर्वाधिकरणे तत्रात एव निराकांक्षस्य न शेषमस्ति उच्यते सर्वाधिकर
णे यागविधिराल्लतिरित्युक्तं तदिह स्मरयामः पर्यग्निकरणं तां गरीति नैराकांक्ष्यं तु न स्मरयामहे शेषसं
स्थापयतिशब्दानुपपत्तेः किंतु यागस्यैव पशुनोपक्रान्तस्य चोदकप्राप्ताग्नीषोमीयविध्यन्तेनुष्ठीयमा
ने पर्यग्निकृतावस्थायामुत्सर्गः परित्यागः पशोर्विधीयते तस्मिन्नुत्सृष्टे साकांक्षस्य कर्मशेषस्याज्ये
न संस्थापनं विधीयते कर्मान्तरस्य त्वनुपक्रान्तस्य स्वरूपमेव वक्तव्यं न समापनं शेषशब्दस्य चानुपपत्ति राम २६
स्तस्मात् पूर्वत्रैव प्रतिनिधिराज्येनेति प्राप्ते ब्रूमः। न प्रतिनिधिः संभवति तथाहि यदि पशोस्त्यागमात्रं क्रिये
त तत उत्पत्तिवाक्यविहितदेवतासंबंधोनानुष्ठितः स्यात् तत्रैवं देवतासंबंधविधिरप्रमाणं स्यात्। असति च
प्रतिनिधिशब्दः समानकार्यसमात्रपरः ... असदृशस्य प्रतिनिधित्वाभावो ... तेनायं न प्रतिनिधिर्नियमः किं तु भावे
विधिरेवायं रयपक्षे.९

तोदेवता न्व
स्के न न्वित्याः
शेष्यस्य उद्यत
इत्यादिना प्र
र्वपक्षिणेव
परिहृतः॥

देवतासंबंधे यागविधित्वं न स्यात् प्रत्यक्षयज्यश्रवणादयमिति यागे ग्नीषोमीयविध्यं तस्यामाप्तेः पर्यग्निकृतो
त्सर्गः शेषसंस्थापनं चोभयमप्यनुपपन्नं। अथ देवतामुद्दिश्य पात्रस्त्यज्येत ततः पशुसाधनके यागे पशुनैव
मुख्येन साधिते किमर्थः प्रतिनिधिः देवतोद्देशेन चोत्सर्गउत्पत्तिवाक्यसिद्धत्वान्न पर्यग्निकरणवाक्येन वि
धातव्यः तस्मात्पूर्वाधिकरणान्यायेन पर्यग्निकरणांतां गरीति विधानात्तयैव निराकांक्षस्य पशू र्वस्यकर्मणः
समाप्तत्वान्न शेषमस्ति यस्मिन्नाज्येन संस्थापनमुच्येतेति तस्मात्कर्मांतरविधिरेवायमिति तेन च देवतान्ता
वः प्राकृतपात्नीवतपदानुषंगादिह संस्थापयतीति प्रत्ययार्थेन भावनया आज्यप्रातिपदिकार्थानुषक्तेदे
वतापद्युक्तः संबध्यते। तदयमर्थः। पात्नीवतमाज्यं कुर्यादिति। शेषसंस्थाशब्दश्चसादृश्यात् पूर्वो हि यागः
पत्नीवद्देवत्यः पर्यग्निकरणमात्रे संस्थापितः सशेषइव तदनंतरं चाज्ययागः पत्नीवद्देवत्यार्थक्रियमाणस्त
त्रैव शेषसमापनमिव भवति यागाज्यप्रातिपदिके तृतीयासापि संस्थासंबंधानुवाद एव। प्रातिपदिका
र्थमात्रं तु देवतासंबंधित्वेन विधीयत इति सिद्धं कर्मांतरत्वं॥ ॥प्राकृतार्थपतितान्यकार्यतो मंत्रसाम
विषये च संस्कृतो। एवमुह्यविधिरत्र चिंतितो बाधचिंतनमतः करिष्यते॥ ॥इति श्रीपार्थसारथिमि राम
श्रकृतौ शास्त्रदीपिकायां नवमाध्यायस्य चतुर्थः पादः समाप्तः॥ ॥समाप्तश्चायमध्यायः॥ छ॥ ॥ ३०
प्राकृतस्याग्नेर्योर्थः प्रयोजनं तत्र पतितस्तत्स्था नापन्नो न्यः स्वर्यस्तद्रूपप्रकाश्यत्वेन कार्यं तद्वल्लादिति। मंत्रे च प्राकृतगिरापदस्यार्थे पतितेन तत्स्थाना
पन्नमन्यद्गिरापदं तद्रूपं यद्धि कार्यत्वेन कार्यं तद्वल्लादिति साम्नि प्राकृतद्वयं ब्रीहयं तदर्थे तत्प्रयोजने पतितेन तत्स्थानापन्नमन्यन्नीवारा
दि द्रव्यं तत्प्रयस्कार्यं वैतुष्यरूपेण न द्वल्लादि [illegible] विषयश्चैकर्मचारय॥३

सर्वसिद्धांतेन दर्वपक्षमाहत त्रेतिकर्मोदिनवका ह्याक्यपंचकसेवक्वरमित्याशयः। अपरे वेति। द्वौरि त्तमध्यम स्त्वेवि
ष्टा अष्टाकपाल श्च स्तदधिम्रते अनयोश्च सप्तम्यर्थे रूपो वयागानयाइति चविप्रतिरथो अप्राप्ता अवश्यमा
वयोर्विधेयाः तद्धि यो चापूर्वं त्रयार्थकर्मत्रयार्थवाकात्रयादेवोपपन्ने धिकावाक्यद्वयकल्पनानर्थिक्ये वेत्याशयः॥ ॥
स्त्रतशास्त्र न्याये नकिंञ्च सनुरोधाद दृष्टार्थतापि स्वीकार्ये [illegible] प्रयाजशेषाभिघारणन्याये न दृष्टार्थत्वानुरो
धाद्बुतिरपि स्याज्येति संशयप्रसक्तं प्रदेयत्वाज्जेद्यपत्य [illegible] तस्य स्रुतेच प्रदेयधर्म क्रियाक्रिया संशयं सहे वाहवि
मिति। नत्रेति। प्रयाजशेषैर्हवींषीति च दृष्टार्थत्वानुरोध न द्वितीयात्तृतीयाथ्योत्तृतीयाद्वितीयार्थलक्षणयामे
त्रावरुणेनपयः श्रीणातीति वचन व्यक्तो यथोपधानसंस्कृतस्य चरोः प्रकरणावगत चेयनागत्वा वोपधानसं
स्कार्यत्वान्यथानुपपन्न्या चयनाङ्गत्वं कल्प्यते तथा ज्योतिष्टोमप्रकरणावगततदङ्गत्वादेव मैत्रावरुणाश्रयणसं
स्कार्यत्वान्यथानुपपत्त्या ज्योतिष्टोमाङ्गत्वं कल्प्यत इत्याशयः। द्वितीयपयेति। सोमेन यजेत स्रुत नेति रपुनस्य
सोमस्यैवयागसाधनत्वादेदृवायवेगृह्णातीति च न द्वितल्मक्ष्याधारावाक्यप्रकृतस्य सोमरसस्यैव देवता
त्वयानद्विरोधे दृष्टार्थत्वन्यायमात्रेण न द्वितीयात्तृतीयालक्षणेति भंगः। प्रकरणाच्चांगत्वकल्पनेऽनु मोऽप्र
याजशेषेनुप्रमाणांतर विरोधाभावाच्छ्रुतिभंगः इति विषम्यमित्याशयः॥ ॥

शास्त्रदीपिकायां नवमोऽध्यायः